CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

G.D.P.13.

Coll. No. 748

Title Vyākarāna Grantha

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 748 Subject: Grammar

Title: Vyākaraṇa Grantha

Author: Scribe: –

Date of the work: – Date of the Ms.:

Place of the work: – Place of the Ms.: –

Size: 9.6" by 5.1" Extent: 90 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: Begins & Ends abruptly.

इति तदुपस्थितिपरं। तज्जन्योपस्थितिसहकारिणा संख्याप्रकारकबोधप्रापकं। अन्य-
थासु तूपस्थिताया अपि संख्याया ऐक्ये नोक्तदोषतादवस्थ्यापत्तिः। काष्ठैः तंडुलं पचन्-
तीत्यत्राख्यातार्थसंख्यायाः करणादावन्वयबोधवारणाय कर्तृविशेष्यकत्वादेः का-
र्यतावच्छेदककोटौ निवेशः। ननु तथापि कर्तृप्रत्यये कर्मणि कर्मप्रत्यये कर्तरि तदापत्ति-
रिति चेन्न। कर्तृकर्मणोराख्यातार्थत्वस्य निवेशनीयत्वात्। तस्य च पूर्ववदेवार्थानभिमत
तदवस्थो दोषः। पदान्तरेण कर्माद्युपस्थितिस्तस्मादन्वयबोधवारणायाख्यातजन्यत्वं तदु-
पस्थितौ निवेशितं चेत्तस्य तथाविधसंख्योपस्थितिसत्तेऽभीत्रसत्वादशावारणाय
समवायस्य तद्घटकत्वस्यानिवेशः। वस्तुतस्तु कर्तृकर्मविशेष्यकत्वं कार्यतावच्छे-
दकेन निवेश्यं कर्तृताप्रवच्छिन्नविशेष्यतासंबंधेन कार्यकारणभावांगीकारान्न पूर्वो-
क्तदोषः। तज्जन्योकर्माद्युपस्थितिः तद्बोध्यकार्यताकारणतावच्छेदककोटौ न तु
स्वीयत्वप्रवेशान्न चैवमस्येत्यादिदोषः। तत्तुस्वीयत्वनिवेशाद्बोधकार्यकारणभाव-

नाहुःस्यमिति तु न शंक्यं विषयनिवेशापेक्षया कार्यकारणभावानामसत्त्वात्। विषु
३२ णापेक्षया पुरुषाणामसत्त्वात्। परन्तये कार्यकार्यकारणभावप्रयुक्तं गौरवमाहाने
यायिके ति। वक्ष्यमाणकार्यकारणभावाभ्युपगमे युक्तिमाह। आख्यातार्थे त्यादिना
ऽन्वयादित्वंते न। तथा च तदभ्युपगमेन यावि नियमानुपपत्त्या सआवश्यक
ः द्वितीयाद्यन्तपदोपस्थापितद्रव्यापत्तेरिति भावः। आख्यातार्थेति। पूर्ववद्व्या-
ख्येयं पदप्रयोजनमपि पूर्ववदवगंतव्यं। अन्योपस्थितिरिति। विषयनिष्ठप्रत्यास
त्याकार्यत्वकारणत्वपक्षे प्रथमान्तपदार्थनिष्ठविषयताकारणतावच्छेदकत्तृ
णाप्रवेश्या। नातः सम्भहानं यत्नप्रथमान्तपदजन्योपस्थितिविषयता याः पदार्था
न्तरे सत्त्वाद्व्यभिचारः प्रथमान्तपदजन्येत्यादिना पदान्तरजन्योपस्थितेः कारणता
भ्युपगनादेतन्मते तत्समतापेक्षया गौरवमावेदितं। सोपीति। उक्तकारणभावोपि। चंद्र इ
वेति। चंद्र इंदः प्रथमान्तार्थतया चंद्रभोजनादेरिद्वयत्ने ऽप्रतीत्या प्यारख्याना राम
३२

र्थे सरव्याप्रकारकान्वयबोधापत्तिरननुभवात्। चंद्र इव चन्द्रयेत्ते मुखेइत्यादौ चंद्रयेते
इतिद्विवचनाद्यनुपपत्तिः चंद्रस्यैकत्वेन द्वित्वान्वयासंभवात्। न च कारणे न कर्य
जनुनाद्विशेषतत्प्राप्पद्ग्रकाभावःसामग्र्या एवापादकत्वात्। मुखे एवतदन्वयबोधो
न चंद्र इति नियमानिवाह सोऽन्द्रावनीयत्वाच्च। इतरविशेषणत्वे तिसमवायेन का
र्यकारणभावपक्षे इतरविशेषणतानापन्नप्रथमांतार्थविशेष्यकत्वे कार्यतावच्छे
दककोटिघंतभावनीयं। द्वितीयपक्षे इतरविशेषणे पैतानापन्ननिष्ठविषयतैव प्र
त्यासत्तिस्तेन्न निवेश्योल्यर्थः। चांद्रभोजनसपिजननक्रियायां वार्थत्सादृश्यस्यैवि
शेषणत्वान्नोक्तापत्तिः। अतिगौरवमिति। स्वमते चंद्रादेस्त आख्यातार्थत्व विरहे
णतत्र संख्यान्वयबोधस्याप्रसक्तन पानेतरविशेषणत्वनतत्रांतर्भावनीयमिति
भावः। इदमपि उक्तत्वागौरवमपि। समनेपरमतापेक्षया लाघवमपि निवार्यः। ननु
व्यापारे विशेषणत्वमन्याय्यं समानप्रत्ययोपात्तयोः कर्तृकर्मणोरेवतदन्वयस्यो

च्चिनत्वान्नानच धातोरित्यनुवृत्त्या प्रयोगसमये धातोर्वर्तमानत्वाविवक्षणान्न दर्श
गतवर्तमानत्वइत्यर्थस्ताभाव्यापारे एवतदनयोगीकरइति वाच्यं। फलस्यापि धात्व
३३ र्थत्वाविशेषेण व्यापारे एवतदन्वये विनिगमकाभावात्। इत्यत आह। तथाहि ति
त्तश्च धात्वनुपदं च। धात्वर्थं वदन् उक्तरीत्या धात्वर्थबोधयतो नाम धात्वात् मा धा
न्याच्च। चकारेण लक्ष्यानुरोधपरिग्रहः। तेन पच्यते पच्यमान इत्यादौ फलस्य प्रा
धान्येपि न क्षतिः। कर्तृकर्मणोरेवेति। न च पूर्वोक्तयुक्त्या व्यापारे एवान्वयइति वाच्यं
। अनुवृत्तधातोरित्यस्य पंचम्यंतनयातथाकाङ्क्षार्थासंभवात्। आख्यातमात्नाभा
वात्। लक्षणैकचक्षुष्कस्य लक्ष्यदर्शनाभावाच्चेति भावः। लक्ष्यैकचक्षुष्कदर्शि
नामिवायमसमाधत्ते अतीतेति। अनिष्टप्रसंजनमुत्काइष्टसिद्धिमप्याह। अ
पाक्षीदिति निनुफलेएवतदन्वयः स्यात् क्रियतां तु अच न पूर्वोक्तदोषावसर इ
त्यादयश्च निराचष्टे नापीत्यादिना आपने अश्वत्थं तेन। प्रयोगापत्तिरिति। फले राम ३३

तदनयोगीकारपक्षे तु फलस्य अवर्तमानानन्वयानापत्ते दोषः। तथा वायमपि पक्षो
दुष्टः। एवं च सर्वपक्षाणां दुष्टत्वे तु लभ्ये एतत्पक्षस्यैवाश्रयणमनुचितमिति भावः
। अज्ञानादप्रयोगादिति। ज्ञानस्यैव बुबोधयिषया प्रयोगे निमित्तत्वात्। भुका
दिवत्प्रयोगस्तु दुष्ट एव। ननु परयुक्तस्य प्रसक्तस्य अनुमानिकादिज्ञानसं
भवान्नयाविवक्षप्रयोगापत्तिर्दुर्वारैवेत्याशंक्य दाय त्यापरिहरतिकिंचित्यर्थे
त्यादितेनत्यर्थाः। रा आदिनातदोषलेखादिः। वरहग्रहणे कारणादयस्तु न दोष
यत्तौ नोत्यानात्मकफलानुकूलः। अकिंतु न दुदेस्य यकैः। अत एव तत्रोत्थाना
युयतइत्येव प्रयोगो नोत्तिष्ठतीति। अनुकूलता विशेषस्यैव फलव्यापार
योर संसर्गनयाभ्युपेयत्वात्। अत एव तंडुलं कयणादिदशायामपंच
तीति न प्रयोगइत्याहुः। एवं चेति। एवं पूर्वोक्तयुक्तीनामवतूपाश्रलीयत्वे। भावनेव धात्व
र्थ एव। ननु भावनापाधातुवाच्यत्वे कर्त्रादेस्तिङ्वाच्यत्वेतस्याः प्रत्ययार्थसाधनं प्रति विशेषणत्वा

पतिःसंख्याकालाद्यतिरिक्तप्रत्ययार्थस्य प्रकृत्यर्थंप्रतिप्राधान्यस्यैवनियमादितिमीमांसकाः।
दिशोक्तंदूषणमाशंक्यनिराचष्टे।यद्यपीति।भावप्रधानमिति।आख्यातमिति।तत्तिङर्थनि
३४ ष्ठप्रकारतानिरूपितधात्वर्थनिष्ठविशेष्यताकबोधजनकनामानिसत्त्वप्रधाना
नि।सत्त्वंद्रव्यंलिंगाद्यन्वयितत्प्रधानकबोधजनकंतन्निष्ठमुख्यविशेष्यताकबोध
जनकमित्यर्थः।मुख्यविशेष्यतानिवेशश्चपचतीत्यादौतिङन्तेआश्रयत्वसंख्यानिष्ठ
प्रकारतानिरूपितकर्त्रादिरूपसत्त्वनिष्ठविशेष्यताकबोधजनकत्वेपिनातिप्रसं
गः।क्रियानिष्ठप्रकारतानिरूपितविशेष्यतानिवेशेनतत्रातिप्रसंगवारणेपिपठ
इत्यादावव्याप्तेः।धात्वर्थभावनाप्राधान्यमवसीयतइति।तथाचनिरुक्तभाष्यप्र
माणेनोक्तनियमसंकोचोवश्यमंगीकार्योभवतामेवप्रत्युतनिरुक्तादिविरोधइ
तिभावः।नचभावयतीतिभावइतिव्युत्पत्त्याभावयतीतिणिजन्तभावपदे
नकृतिरूपाभावनोच्यतेक्रियापदेनापिसैवतथाचतिङर्थकालादिमध्ये राम
३४

कृतिरूपतदर्थस्यैवप्राधान्यंतथाचधात्वर्थनिष्ठप्रकारतानिरूपितकृतिनिष्ठ
विशेष्यताशालिबोधकजनकमाख्यातमितितदर्थः।एवंचनिरुक्तादिकमव
त्वभिमतार्थसाधकमस्मत्प्रतिकूलंवापचतीत्यादितःकृतिनिष्ठविशेष्यताक
बोधोत्पत्तेरितिचेन्न।रथोगच्छतिजानातीत्यादावव्याप्तेः।कृतेरप्रतीतेः।कृ
तेरितीत्यत्रतत्प्रतीतावपितिङर्थत्वाभावात्।एवंपच्यतइतिकर्माख्यातेसुप्यतइ
तिभावाख्यातेव्याप्तेश्च।नचतिङ्प्रत्ययेनकर्तुरबोधनात्।नचैवंतदपरिनाद्देव
दत्तेनपच्यतइत्यादिवाक्यात्कृतिप्रतीतिर्नस्यादितिचेत्।नतृतीययैवतद्बोधसंभ
वात्।नचाधेयत्वमेवतन्मतेतृतीयार्थःअतएवदेवदत्तेनपच्यतेनयज्ञदत्तेनेत्यत्रतृतीय
यज्ञदत्तवृत्तित्वस्याश्रयत्वसंबंधावच्छिन्नप्रतियोगिताकाभावबोधसंभवः।तस्याः।
कृत्यर्थकत्वेतुकृतेर्जन्यत्वसंबंधावच्छिन्नप्रतियोगिताकाभावएवक्रियायांबोध
नीयः।तच्चनसंभवतिजन्यत्वसंबन्धस्यनियामकतयाप्रतियोगितावच्छेदकत्वास

भवात्। आश्रयत्वसंबंधावच्छिन्नप्रतियोगिताकाभावभानोपगमेपि यत्रेदन्त
कर्त्तृकपाकेपि तादृशाभावस्याबाधिततया तादृशप्रयोगापत्तिः तथा च तत्रा-
३५ निरूपकत्वसंबंधेन तदर्थकत्वमभ्युपगम्यते इति तत्राव्याप्तिरिति वाच्यं। देवदत्तेन प-
क्वस्तंडुल इत्यत्र कृतिबोधानापत्त्या तृतीयास्तदर्थकत्वावश्यकत्वात्। अत एव
कर्तृकरणयोस्तृतीयेत्यनुशासनमपि साधु संगच्छते। प्राचीननैयायिकैस्तु नि-
यामकसंबंधस्याभावप्रतियोगितावच्छेदकतानंगीकारात्तु न असमभिव्याहारे दो-
षः। नव्यामते तु कृतिजन्यत्वस्य तृतीयार्थत्वान्नोक्तदोषः। एवं च तृतीयैव तद्बो-
धनसंभवे कर्माख्यातस्य तद्बोधकत्वाभावात् पच्यते इत्यादावव्याप्तिर्दुष्परि-
हरैव। तृतीयाया आधेयत्वमेवार्थः कर्माख्यातेन च कृतिर्बोध्यते तत्र प्रत्ययस्य ले-
तृतीयायाः कृतौ कृतिजन्यत्वे वा लक्षणाभ्युपगमेपि कर्माख्याते कृतेः प्राधा-
न्याभावादव्याप्तिस्तदवस्थैव। न च कृतिपदसंख्याकालाद्यतिरिक्ततिङर्थमा राम
३५

त्र परं तथा च नरः योगवृत्तिजानाति न खलितिङ्त्याक्षेपव्यत इत्यत्राव्याप्तिः तत्रापि
आश्रयत्वादेस्तदर्थस्यावगाहनादिति वाच्यं एवमपि भावाख्यातेऽव्याप्तेरपरिहा-
रात्। न च तत्रापि तङर्थकृत्याश्रयत्वविशेष्यकबोधांगीकारान्नाव्याप्तिसंभवः
चैत्रेण सुप्यते गगनेन स्थीयते इत्यादितश्चैत्रवृत्तिः स्वापानुकूलकृतिः गगनवृत्ति-
:स्थित्याश्रयता इति बोधसंभवादिति वाच्यं। तार्किकैस्तादृशबोधानानुभवसिद्धो-
पि तु चैत्रवृत्तिकृतिजन्यः स्वापः गगनवृत्तिः स्थितिरित्येव बोधोनुभवसिद्ध इत्युक्त-
त्वात्। तन्न जनितबोधके पचतीत्यादावव्याप्तिवारणाय तथाविधजनकतावच्छे-
दकानुपूर्व्यादिकल्पमेव वक्तव्यं एवं च न भावाख्यातेऽव्याप्तिः भूयते इत्यादितोपि
कर्मत्वतात्पर्यग्रहदशायां प्रत्ययार्थविशेष्यकबोधजननेन तादृशानुपूर्व्या अपि त-
थाविधबोधजनकत्वात्ततः आख्यातान्न चैत्रेण सुप्यत इत्यादितः पूर्वोक्त एव बो-
धोंगीक्रियते न एवं भावनाविशेष्यविरहादजन्विते च संख्यैत्याख्यातवादः

स्यादीप्सितिमर्थः संगच्छते। नन्वमुख्यविशेष्यताकबोधानुभावेनेतरविशेष्य
ताकबोधविरहादिसंयुक्तत्वात्। धात्वर्थनिरूपकतासंबंधेन भावनाप्रकार
३६ कबोधसंभवेन यथाश्रुतमसंगतेः। तिङर्थभावनाया धात्वर्थविशेष्यताक
बोधस्यान्यलभ्यत्वस्य परत्वापेक्षयाऽवतादृशानिरूक्तापनुरोधेनतादृशबोध
स्वीकारस्येति न दोषः। मामासनयेन त्वयार्थव्यापाररूपभावनायामाधान्येसेव
संभवाच्च। तथा च पचतीत्यादावाख्यातप्रत्ययार्थः कृत्यादिरूपा भावनासैवेच
प्रधानमिति मतमेव सम्यक् प्रकृतिप्रत्ययार्थिति नियमस्यासंकोचेनैव निर्वाहा
दित्यत आह। अपिचेति। अभेदान्वयादिति। कुतः प्रत्ययार्थत्वपक्षे। कृतो
स्तदर्थत्वपक्षे तु आश्रयत्वसंबंधेनान्वयादिति भावः। भाष्यान्यापत्तिरिति। प्रत्य
योर्थः कृत्यादेरितरविशेषणतानापन्नत्वाप्रधानत्वार्थे प्रकारतया बोधजनक।
सामग्रीसत्वान्नैयायिकमतसिद्धतथाविधबोधस्वीकारापत्तिरिति ननुप्रथमां राम
३६

नार्थमुख्यविशेष्यकबोधे दृष्टापत्तिः यत। तदंगीकारे एव प्रथमान्तार्थोद्देश्यकभा
वनाविधेयकान्वयबोधस्य सर्वानुभवसिद्धस्य निर्वाहो भवतीति न क्रियाविशेष्य
कबोधस्वीकारे देवदत्तः पचतीति वाक्यजन्यबोधद्वयं देवदत्तः पाकानुकूल
कृतिमानेवेति संशयानुत्पत्तिर्निर्वाहश्च क्रियाप्राधान्यमतेन सामानवि
शेष्यकैककोटिप्रकारकनिश्चयस्यैव तत्तदभावकोटिकसंशयनिवर्तकत्वादिति
शंकां परिहर्तुमाह। तथा चेति। भाष्येति। कान्तह्य यं वाचोयुक्तिः पचति भवति त्वं प
चसि भवति पचामि भवामीति प्रश्नेऽत्र उत्तरं पचादयः क्रियाः भवतिः क्रियायाः
कर्त्री भवतीति भवत्यादिसमस्य भाष्येत्यर्थः। अत्र पचति भवतीत्यस्य भवति
पचन्ती पककिर्ययासरूपता भवतीत्यर्थः। एतेन भविष्यत्याः क्रियायाः कर्तृकव
र्तमानभवनसत्वाभावादृश भयोगानिर्वाह इति दूषणं प्रत्युक्तं। अत्र क्रियाकार
कभावेनान्वयांगीरात्र तु येन पश्य मृगं इत्यत्रापि क्रिययोस्तथाबोधः तदभूप

गतत्व इति भावः।एवं कर्मण्यायमभिप्रेतोऽस्त्वेन क्रियाया ग्रहणं कर्त्तव्यमिति वार्त्तिकखंड
नार्थे क्रियापि कृत्रिमकर्मक्रियया हि क्रियाईप्सिता भवति कर्तृक्रियाक्रियया या स
३७ दर्शनादि क्रियेति भाष्ये उक्तं तद्दर्शितत्वाद्ध्यावनक्रियाया दर्शनक्रियां प्रत्यपि कर्म
त्वमभिमतमेवं च मृगकर्तृकध्यावनकर्मकं दर्शनमित्यर्थे न तद्वाक्यं भाष्यकृतामभ
भिमतमिति भावः।हरिणाप्युक्तं सुबंतं हि यथानेकं तिङंतस्य विशेषणं तथा तिङंतं त
मप्युक्तं तिङंतस्य विशेषणमिति।पुरीमवस्कंद लुनीहि नंदनमिति भाष्यप्रयोगसमु
च्चये न्यतरस्यामिति सूत्रे कौमुद्युदाहृते स एव तिङं नार्थक्रियायाणां विशेष्य
विशेषणभावः।परमतेऽएकवाक्यत्वानुपपत्तेर्बीजमाह प्रथमांतेति।प्रथमां
तमृगपदोपस्थापितस्यार्थः विशेष्य[illegible]प्यस्येत्यनेन ध्यावनं प्रति विशेषणत्वाद्द
र्शने साक्षाद्विशेषणत्वादंतरंगादपि प्रध्यानकार्यस्य बलवत्तयाहेतुमतिर्येति
सत्रभाष्यसंमतत्वेनांतरंगमपि प्रथमांतव्यापित्वाद्द्वितीयास्यात्मिमतुनामंदोषः। राम ३७

मृगस्य ध्यावनं प्रति विशेषणत्वेनांतरंगत्वाज्ज्ञानस्य प्रथममारूपसंस्कारस्याविवक्षितेरि
निस्त्वचितमिति निवदंति द्वितीयापत्तेरिति।तथा च ध्यावनाश्रयमृगकर्मकदर्श
नाश्रयस्त्वमित्यर्थं वाक्यस्यैव संभवेन तादृशवाक्यस्यैवासिद्धिरिति भावः।स्वमते
तु न द्वितीयापत्तिः ध्यावनस्य धात्वर्थतया कर्मभूतनद्वाचकधातोरप्रातिपदिक
त्वात्।न च द्वितीयाविरहे कर्मत्वभानापत्तिर्व्युत्पत्त्यापदानुपस्थितत्वादिति वाच्यं
भिमांसकनयेऽर्थोपस्थितिमानसे शाब्दबोधे नंत्रतयापदजन्योपस्थितिं
विनापि कर्मत्वप्रकारकबोधसंभवात्।नादृशोपस्थितिहेतुतावादिमते तु न संसर्ग
कबोधस्यैवाभ्युपगमात्।न च तार्किकमतेपि न द्वितीयापत्तिः ध्यावनक्रियावि
शिष्टमृगस्यैव कर्मतासंबंधेन दर्शनक्रियायामन्वयोऽस्तु न तु केवलमृगस्य विशिष्टस्यापुद्दृ
स्तंतिरेकेपि मृगत्वागत्वावच्छिन्नप्रकारतापेक्षया ध्यावनविशिष्टमृगत्वावच्छिन्नप्रका
रताया भिन्नत्वाकात्।नामार्थधात्वर्थयोः साक्षाद्भेदेनान्वयव्युत्पत्तिविरोधोपिन

तादृशव्युत्पत्तेः केवलनामार्थयोरेवार्थान्वयविषयत्वात्। अतएवनञुत्वामभेदेनमाहा
त्म्यं नयाचीत्यत्र तयःस्नुभाः। ज्ञानामिसीताजनकप्रसूतेत्यादिसंगच्छते। भन्नान्तेठ
३८ त्यनिपदादिनोऽहितोयापत्तेरसंगतिः स्पष्टैव एवं च प्रथमान्तार्थमुख्यविशेष्यकबोधं
गौरेनकोपिदिष्टप्रवृत्तिवाच्यं। नीलादिविशिष्टघटादेः कर्मत्वबोधे नीलं घटमित्यत्र
द्वितीयानापत्तेः। प्रथमापत्तेश्च। न चेष्टापत्तिः अनभिहितस्त्वप्रसभाप्यविरोधात्। त
त्र हि भीमसमुद्रादेकंकुरु इत्यत्र विशिष्टस्य कर्मत्वपक्षे कटपदादुत्पन्नया द्वितीयया
ऽभिधानेभीमसादिपदान्न दुत्पत्तिनसादितिनिडादिपरिगणनेन मित्युक्तं। न च क
र्मत्वस्य प्रातिपदिकार्थविशेष्यतया विवक्षायामेव द्वितीयानानुसंसर्गतया विवक्षाया
मपि प्रकृतभाष्यग्रंथस्य कर्मत्वस्य विशेष्यतापरत्वनिर्नैन हि रोधइति वाच्यं। भाष्यकार
मतेसर्वत्र विभक्त्यर्थस्य संसर्गतया भानात्तथावृक्तुमशक्यत्वात्। नीलादिविशिष्टघ
टादिक्रियायां हरणकदेशकरणत्वादिसंबंधेन वा धत्वात्ययोनीलो घट आहरविद्र राम ३८

न ज्ञालाणोंदेहीत्यादिप्रयोगापत्तिश्च उक्तरीत्या व्युत्पत्तिविरोधाभावात्। तृतीयाघनापत्ते
श्च। न च तन्त्रापी ष्टापत्तिः तादृशप्रयोगाणामुक्तार्थेकाव्यप्रत्युरणादवनुपपत्तेभान्त्। नीलो
घट आनयमुक्तस्तंदुलं पचतीत्यादिषु तिङ्समानाधिकरणे प्रथमाऽभिहिते प्र
थमेत्यनुशासनात्प्रथमायाअप्यनुत्पत्त्यातादृशप्रयोगासिद्धिश्च। एवं च नयाचीत्यत्र यः
स्नुभाद्यत्यादिप्रयोगा आर्षत्वादेव समाधेयाः आनार्षस्तसाधुरेव। दृशधातोरूत्तरठस्यावर्न
कर्तृमृगकर्मक दर्शनेमृगकर्तकोत्कठ्यावनकर्मकदर्शनेवा लक्षणादूतरपदार्थेतात्पर्य।
ग्राहकाणि अतोन व्युत्पत्तिविरोधस्तेषोपि। मृगकर्तृको त्कठ्यावनकर्मकदर्शन सप्र
तिपिपादयिषितस्य बोधजिर्होहोपि भवतीति नु न युक्तं दिङ्करीत्या लक्षणां विनैव निर्वा
हेसदाश्रयणस्यानुचितत्वात्। अनुपपत्तिप्रतिसंधानं विनापि बोधोदयाच्च। मुख्य
नन्तुतथापिक्रियामुख्याविशेष्यकाबोधोनयुक्तः अपितु प्रथमान्तार्थमुख्य। विशे
ष्यक एव युक्तः न याहि। अनभिहितेकर्तुरित्नीयेत्यस्य समभिव्याहृतमिङादिना।

कर्तुरवाच्यत्वेऽत्तृतीयेति नार्थः आख्यातिकैः स्वीकर्तुमशक्य तिङ्सामान्यस्यैव कर्तृनिरूपणाति
३९ निरूपकत्वरूपकर्तृवाचकतया चैत्रेण पच्यते तण्डुल इत्यत्रापि तृतीयानापत्तेः। कर्तृत्वविषय
कोसाधुत्वादेकं चैत्रः पच्यत इत्यादिप्रयोगवारणसंभवेयगाघतुतरत्वलादेर्गौरवेण वा
चकतावच्छेदककोटावनुप्रवेशाभावात्। नाप्यबोध्यकर्तरि तृतीयेत्यर्थः। चैत्रेण पच्य
ते इति वाक्यस्य कर्तृविषयकबोधजनकत्वेन तद्घटकत्वपदानामपि तद्बोधजनकतया
कर्तुः तिङ्बोध्यत्वात्तद्घटनादनुस्यात्तुन चत्तत्वाद्धोपयिकाकाङ्क्षाशून्यत्वमेव तद्बो
धकत्वं निवेश्यं पच्यत इत्यत्र तद्बोधप्रयोजकाकाङ्क्षाशून्यत्वमप्यतने चैत्रेनादिपदोत्त
रतृतीयैव तद्बोधसंभवात् तत्तादृशाकाङ्क्षायाः अकुत्सनादिति वाच्यं। चैत्रेण
पच्यत इत्यादेस्तृतीयानुपपत्तेः चैत्रः पच्यत इत्यत्र चैत्रप्रकारककर्तृविशेष्य
कक्रियामुख्यविशेष्यकस्य पच्यते इत्यत्र कर्तृप्रकारकक्रियाविशेष्यकबोध
त्वात् बोध्यस्यायातनानुपूर्वीरूपाकाङ्क्षायास्तद्बोधोपयिकत्वावश्यकत्वात् राम ३९

चसमभिव्याहाररूपेवाकाङ्क्षाविवक्षणीया पक्तेत्यानुपूर्वीरूपेवसानयाविधेतिनो
क्तदोष इति वाच्यं। तथासति चैत्रेण पचतीत्यादावपि तृतीयापत्तेः। तादृशसमभि
व्याहारस्य तद्बोधोपयिकत्वाभावात्। तस्मात्तत्प्रातिपदिकार्थविशेष्यतया
कर्तृविवक्षायां तत्प्रातिपदिकात्तृतीयेत्येवानुशिष्टेनेत्तृतीयेत्यस्यार्थो वा
च्यः। तथा च चैत्रः पचतीत्यत्रापि चैत्रपदात्तृतीयापत्तिः चैत्रेण पच्यत इत्यादाविव
कर्तुश्चैत्रपदार्थप्रतिविशेष्यत्वाविशेषात्। तस्मात्प्रथमान्तार्थमुख्यविशेष्यकशा
ब्दबोधोपयुक्ताकाङ्क्षाशून्यमिति वेदाथ्यमिति। प्रातिपदिकार्थविशेष्यतयेत्याप्रकृ
तीतेरनुसरेण भिन्नचैत्रेण पचतीति प्रयोगापत्तिः क्रियामुख्यविशेष्यकबोध
वादिमते कर्तृविशेष्यताप्रत्ययामेव क्रियायां तृतीयाकत्रेनयबोधानादिमि
त्युएकपदोपात्तत्वतत्वात्मस्त्वापरवंभवतिङ्योग्यबोधस्य जातत्वात्। अ
थवा तिङ्ग्रांदेः कर्त्रनभिधायकत्वं तत्तात्पर्यशून्यत्वं तद्दतात्पर्ये चैत्रेण पच

तीयायाः साधुत्वेपि भावकर्मणोरित्यात्मनेपदे नवाध्यात्मपरस्मैपदं साधु इत्यता
दृशप्रयोगापत्तिः। चैत्रेण पच्यत इति प्रयोगस्तु तत्साधित्यपि न कर्तृतात्पर्येण भा
४० वेन तत्रायोऽविषयतया यकोदुर्वारत्वात्। तथा च धनात प्रातिपदिकार्थस्या
तिङर्थानुपस्थित कर्तृत्वाविवक्षायां ततस्तृतीयेति तद्र्थः। तथा चैतादृशक
र्त्रन्वितत्वात्प्रातिपदिकार्थविशेष्यत्वेन कर्तृविवक्षायां तृतीयेति पर्यवसि
तार्थः इति न कोपि दोषः पदान्तरार्थकर्तरि तृतीयादिकं विधित्सितं समभिव्या
हृततिङाद्यनुपस्थाप्यत्वात् कर्त्रन्वितत्वमुपादेयमतो भुंजानेन चैत्रेण पच्य
त इत्यत्र भुंजानेत्यर्थकर्त्रन्वितत्वेपि चैत्रसमभिव्याहृतपदात्तृतीयानुपपत्तिः प्रविक्रि
याकर्त्रन्वयात्। तत्तद्धात्वर्थक्रियाव्यक्तित्वतत्पत्तित्वेनोपादाय तत्तद्विध
ततत्क्रियाकर्त्रन्वितत्वं निवेश्यं तेन चैत्रेण दृश्यमानं मैत्रं देवदत्तः प
श्यतीत्यादेर्न मैत्रादिपदात्तृतीयानुपपत्तिः। वस्तुतः कर्तुः समभिव्याहृत राम
४०

तिङादेस्तात्पर्यशून्यत्वे कर्तृपरप्रातिपदिकात्तृतीयेत्यनभिहिते कर्तरि तृती
येत्यस्यार्थः। चैत्रेण पच्यत इत्यत्र तिङः प्रत्ययस्य कर्तृतात्पर्यकत्वाच्चैत्रः प
चतीत्यत्र तस्य न तात्पर्यकत्वात्तृतीयातत्प्रयोगनिर्वाहः। एवमेवानभि
हिते कर्मणि द्वितीयेत्यादेरर्थोवसेयः। ननु पक्त्वा भुंक्ते चैत्रः पक्त्वा भुज्यत
ओदन इत्यादेः क्त्वाप्रत्ययेन कर्तृकर्मानभिधानाच्चैत्रपदात्तृतीयाया ओ
दनपदाद्द्वितीयायाश्चापत्तिः। न च समभिव्याहृततिङाभिहितत्वसामा
न्याभावस्यैव विवक्षणात्प्रथमे कर्तुः कृतानभिधानेपि तिङाभिधानाद्द्वि
तीये कृता कर्मणोनभिधानेपि तिङाभिधानान्नोक्तदोष इति वाच्यं चैत्रेण प
क्त्वा मोदनं मैत्रो भुंक्ते पाचकेन चैत्रेण भुज्यत ओदन इत्यादौ ओदन[illegible]पदा
भ्यां द्वितीयातृतीययोरनुपपत्त्यापत्तेः कृतां कर्मणः कर्तुश्चाभिधानादिति
चेन्न। अभिधानं क्रियानिरूपितशक्तेरभिधानं गुणं क्रिया[illegible]पितत्वांके

रभिधाने पि तन्नहि भक्तेः साधुत्वांगीकारात्। गुणक्रियानिरूपितशक्तेरन
भिधानेपि प्रधानक्रियानिरूपितशक्तेरभिधानेतु तन्नहि भक्तेः साधुत्वा
४१ नंगीकारात्। तदुक्तं भर्तृहरिभिः। प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथ
क्। शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते। प्रधानविषया शक्तिः प्रत्यये
नाभिधीयते। यदा गुणे तदा तद्वदनुक्तापि प्रतीयते इति। अयमर्थः कारिकोक्तं प्रधा
नक्रियानिरूपितशक्त्यनुरोधं प्रपंचयति। प्रधानविषयेति। गुणे। गुणनिरूपिता।
अनुक्तापि तद्वत् उक्तवत्। प्रतीयत इति योजना। तुल्यन्यायाद्गुणनिरूपिताया उक्त
त्वेपि प्रधाननिरूपितशक्तेरनुक्तत्वे गुणनिरूपिताप्यनुक्तैवेत्यकामेनापि तद्भ
नइति बोध्यं। अतएव प्रासादे आस्ते इत्यत्र सदि निरूपिताधिकरणतस्याभिधाने
प्यासिनिरूपिताधिकरणत्वनिमित्तिका सप्तमी सिद्ध्यति। अनभिहित इति पर्युद
सांगीकारात् इदं च स्वादमिण भुक्तिरित्यत्र भाष्यस्पष्टं। तत्रहि आचनुमुनः समाना राम
४१

धिकरणेनु प्रयोगे एव प्रत्यया वक्तव्याः। अन्यथा स्वादुकारं भुज्यते यवागूर्दे
वदत्तेनेत्यत्र णमुलः कर्तरि कृदिति कर्तरि स्यात्। तेनाभिधानाद्देवदत्तशब्दात्
तीयानस्यादित्यादिकमुक्त्वाव्ययकृतो भावइत्याश्रित्योक्तपक्षमेवं समाहितं।
तत्रैकेयद्वनयप्येवं पक्त्वौदनं भुंक्ते देवदत्तः पक्त्वौदनो भुज्यते नेति केचित्त
येनकर्तृकर्मणोरनभिधानात्याकांक्षयात्तृतीयाद्वितीयेकस्मान्न भवत इत्याशं
क्य प्रधानक्रियानिरूपितशक्त्यनुरोधेन पूर्ववत्समाहितं। एवं चैतन्मते आख्यातप्र
कारिकेऽपि हरिकारिके इति स्पष्टमेव तद्धि टीकासमानाकारज्ञानभेदाद्विषयताभे
दे मानाभावे पितत ऽज्ञानक्रियानिरूपितकर्मत्वस्यात्मनोभेदाच्चैत्रेण दृश्यमानं पश्य
न्तं मैत्रः पश्यतीत्यत्र तिङ्प्रकृतिभूतक्रियार्थनिरूपितानभिहितकर्मत्वशक्तिप्र
युक्तद्वितीयासिद्धिः। विषयताया द्वितीयार्थत्वं तु नानुशासनसिद्धं। आवरणभंगा
नुकूलव्यापारस्य विषयतासंबंधावच्छिन्नज्ञानानुकूलात्ममनोयोगरूपव्यापारस्य

स्यवानजानात्यार्थत्वेद्रव्याद्यफलस्यक्रियादिभेदेनभिन्नतयाफलरूपत्वेपिकर्म
४२ त्वशंकेर्नेत्याहइतिरित्यत्वेयसंगागतविचारप्रपंचेनआनयधात्वर्थमगइत्येकवाक्य
नस्यान्नक्रियाप्राधान्यवादिमतेक्रियायाआनयनकर्मत्वासंभवान्नन्मतेतुधात्व
र्थविशिष्टमगस्यानत्संभवान्नानुपपत्तिरेकवाक्यतायाइतिनुनन्नवक्यंनिश्चितंध्वस्त
इतिवदुपपत्तेः।एवंब्राह्मणानान्नातेभोज्यतामित्यादिप्रयोगसंगतिः।तादृशैकवा
क्यत्वेमानाभावाच्चेतिदिक्।एतेनभावप्रधानमाख्यातमितिनिरुक्तोप्यनुरोधा
त्तिङर्थस्यक्रियाप्रतिविशेषणत्वोपगमेपिपचतिदेवदत्तइत्यत्रैककर्तृकपाक
क्रियाश्रयोदेवदत्तइतिप्रथमान्तार्थमुख्यविशेष्यकबोधसंभवात्तएवांगी
क्रियतामितिप्रत्युक्तं।उक्तस्यत्वेएकवाक्यत्वानुपपत्तेः।इतिकर्मप्रत्ययस्थले
नप्रत्ययेभावप्रधानेभवइतिनिरुक्तविरोधेतेतिदिक्।कुतोवाक्यभेदइत्य
तआह।अध्याहारेइति।अनन्वयापत्तेश्चेतिचोहेत्वर्थः।तथाचपरमतमन्वयाप राम
४२

त्या।भाष्यकृदभिमतेकत्वकथयतेहानिरित्यर्थः।परमतदूषणमुपसंहरति।एवंचेति।एवं
इत्कर्षीत्याकतुरागत्यानार्थेतो।धात्वर्थप्राधान्येच।भावनाप्रकारकेति।संख्याकालव्यत्ति
रिक्तस्तिङर्थोभावना।अतएवरयोगसूत्रेचेषोजानातीत्यादिअन्यवोधसाध्यारा
णये।कारणमिति।संबन्धेप्यतासंबंधेनभावनाप्रकारकशाब्दबोधेप्रतितत्तत्प्रथमां
तार्थनिष्ठविशेष्यतासंबंधेनतत्तत्प्रथमांतपदजन्योपस्थितिःकारणमित्यर्थः।ते
नस्तम्भहारत्वेनोपस्थितिविषयत्वमादायनातिप्रसंगः।भावनात्वावच्छिन्नेति।इदंच
तुनाभावनात्वप्रकारकबोधेदृष्टमभ्युपेत्य।यदितुविशेषणरूपत्वेनबोधानुरोधात्हि।
उपपत्तिभावच्छिन्नेएवशक्तिस्तर्हितत्तदात्वर्थतावच्छेदकविशेषणरूपावच्छिन्नविष
यतयेतिवोध्यं।कार्यतावच्छेदकेस्तुविशेष्यतासंबन्धोबोध्यः।तिङर्थकर्मप्रकारक
बोधेव्यभिचारवारणायकार्यतावच्छेदकादिनिकर्तृप्रकारकत्वनिवेशः।एवंतिङ
र्थप्रकारकबोधेतत्तत्कृतनिष्ठविशेष्यतासंबंधेनधातुजन्योपस्थितिःकारणमि

त्यपि कार्यकारणभावो द्रष्टव्यः। ननु धात्वर्थव्यापारस्य कृदर्थे प्रत्येव प्रकारत्वं वति
ङाद्यर्थे प्रतीतिनिर्वाहाय भावनाप्रकारकशाब्दबोधे कृज्जन्योपस्थितिः कारण
४३ मिति कार्यकारणभावे आवश्यकस्तथा च पचति भवतीत्यादितः क्रियाप्रका
रकक्रियाविशेष्यकबोधेन संभवति तद्धेतुभूतकृज्जन्योपस्थितेरभावादित्या
शंकां निराकर्तुमाह। भावनेति कृज्जन्योपस्थितिवदिति। यद्यपि यत्नकृज्जन्योप
स्थितेः शब्दान्तरादिज्ञानात् दर्थोपि विषयस्तादृशसमूहालंबनोपस्थितिविष
यताप्यदृष्टार्थे प्रसक्तीत्यतिप्रसंगस्तदवस्थस्तथापि स्वजनकज्ञानीयकृन्निष्ठ
वृत्तिप्रकारतानिरूपितविशेष्यताविशिष्टविशेष्यतासंबंधेन कृज्जन्योप
स्थितेर्हेतुत्वान्नातिप्रसंगः। स्वमुपस्थितिः। समूहालंबनोपस्थितिजनकं।
शक्तिसंबंधेन यत्र कृत्प्रकारकं तदर्थविशेष्यकं ज्ञानं तादृशज्ञानीयकृन्नि
ष्ठप्रकारतानिरूपितविशेष्यतायास्तदर्थकशब्दावेव सत्वात्। धात्वर्थभाव राम
४३

नेति। धातुजन्यभावनाविशेष्यतासंबंधेनोपस्थितिरित्यर्थः। अन्यथा।
हिस्वतादिपदोपस्थितस्यापि सत्तादेर्धात्वर्थत्वानयायादिति प्रसंगापतेः। भावना
पदं च तन्निष्ठविशेष्यतात्वाभार्थमेव। दिगिति। तदर्थस्तु पूर्वेण निरूपितः। यद्य
ननु तिङन्तसमुदायस्याप्येकवाक्यत्वे तिङ् तिङ इति सूत्रेऽतिङः इति व्यर्थं तिङन्ता
न्तरतिङन्तसमानवाक्यस्थत्वविरहाप्रसिद्ध्यापत्तेरिति भाष्योक्तं विरुध्येतेत्य
त आह दिगिति। तत्रैकतिङ् वाक्यमिति पारिभाषिकवाक्यस्य ग्रहणान्न भाष्यवि
रोध इति भावः। अन्यत्र विस्तरः। इत्यत्रेति। प्रत्ययार्थस्य कर्त्रादेर्धात्वर्थविशे
षणत्वेन दर्शनस्यायास्तदर्थकशब्दादविशेषणत्वे च। एकाश्रयिकेति। वर्तमा
नकालिकीत्यपि बोध्यं। तव्यमनेनेककर्तृकेति बोध्याकारो द्रष्टव्यः। पाकानु
कूलेति विक्लित्यनुकूलेत्यर्थः। एकाश्रयिकाया विक्लित्तेस्तदनुकूलाभाव
नेति। भावनेति। भावप्रधानमाख्यातं क्रियाप्रधानमाख्यातमिति निरुक्त

भाष्यानुरोधात्कर्मप्रत्ययांतजन्येऽपि भावनायाः प्राधान्यमिति भावः।वस्तु
कर्मकृदंते फलस्य व्यापारं प्रति प्राधान्यं दृष्टमिति कर्मनिष्ठंतेऽपि तस्यैव मु
४४ ख्यविशेष्यत्वं युक्तं अत एव प्रत्ययार्थसंख्यामनुकृत्य यथाविशेष्यान्वयित्वस्य
सर्वानुकूलस्य न त्यागः।अत एव दृश्यते पुत्रः स्वःपुत्र इत्यत्रैनुपपन्नोयमिति
प्रयोगो भिन्नार्थत्वात् पितृपुत्राभिधत्त्वात्यर्थ एवं क्यजंतात्कर्मणि प्रत्ययस्तु
दुर्लभोऽकर्मकत्वादित्युक्तं सुप आत्मनः क्यजिसूत्रभाष्ये।अन्वयो भयत्रापीच्छा
नुकूलव्यापारस्यात्ममनःसंयोगाख्यात्मकस्य प्राधान्याविरोधादसंगतिः।मुख्ये
तत्त्वकत्र्व्यापारे विशेष्यापरत्वफलमिति भिन्नार्थत्वं स्पष्टमेवेति याचोक्तं।
कैयटेन।यद्वा क्रियाफलस्य प्राधान्यं न दृष्टः पुत्र इष्यते पुत्र इति वाक्यमेव।
ननु क्यजंतस्याकर्मकत्वात्कर्मणि प्रत्ययानुत्पादादिति परे प्राहुः।यथाप्येककर्मप्र
त्यये भावनायाः प्राधान्येऽपि तदर्थसंख्यायाः कर्मणि विशेषणत्वं कर्तृप्रत्यये रम
४४

कर्तरि तावता भिन्नार्थत्वोपपत्तिः।आश्रयाचयमादायापि तदुपपत्तिस्तथापि
भिन्नमुख्यविशेष्यकबोधजनकत्वरूपं भिन्नार्थत्वं विवक्षितं तत्तदसंगतिर्दृष्टे
वे।यत्किंचिदंशे विभिन्नप्रकारकबोधजनकत्वमेव भिन्नार्थकत्वं विवक्षित।
मिति तदुक्तापदनिर्दिष्टप्रत्ययार्थांशे वृत्तिवाक्ययोर्भिन्नार्थत्वविरहे प्रत्यया
वारणे न तस्या किंचित्करत्वादिति भावः।ननु सर्वधातूनां व्यापारार्थकत्वेन संभ
वति नश्यतीत्यादौ तदननुभवादत आह।नश्यतीत्यत्रेति।प्रतियोगित्वविशि
ष्टेति।अन्यप्रतियोगिकनाशसामग्रीसमवधानेऽपि घटो नश्यतीत्यप्रयोगा
त्प्रतियोगित्वविशिष्टेति।स्वप्रतियोगित्वविशिष्टार्थकं।अत एव नाशध्वा
नोत्पादसामग्र्यर्थकत्वादेव।इति प्रयोगः इति।तदर्थकत्वाभावेन नश्यति नंक्ष्यं
ती प्रयोगोपपत्तावपि नाशस्यातीतत्वविरहान्नष्ट इति प्रयोगो न स्यात्।चिरवि
नष्टेऽपि नश्यतीत्येव प्रयोगः स्यात्तत्सामग्र्यर्थकत्वे तु सामग्र्यामेव प्रत्ययार्थकाल

त्वयाऽन्वोक्तापत्त्यनुपपत्तीइतिभावः।इदंचदूषणंवर्तमानरूपनध्वंसप्रतियोगि
त्वरूपमतीतत्वंमत्वयायदतिमत्तेवर्तमानध्वंसप्रतियोगिकालत्वंनिवेश्य
४५ तदूर्यत्वेतुनोक्तादूषणमितिबोध्यं।अंततआश्रयतेवेति।वस्तुतआत्ममनः
संयोगोपिज्ञानानुकूलःसंभवतीतिभावः।अत्रफलतावच्छेदकःसंबंधो
विषयतातेनघटादेःकर्मत्वमितिबोध्यं।ज्ञानमेवफलंतदेवतदनुकूलोव्या
पारःफलतावच्छेदकःसंबंधोविषयता।व्यापारतावच्छेदकस्तुसमवायइति
मतांतरबोध्यं।उभयमिति।इच्छतीत्यादावभिमित्यर्थः।उभयबोधापत्ते
:।उभयत्रापिशक्तेःसत्वादित्यर्थः।ननुयत्रतात्पर्यग्रहस्तत्रैवबोधोनतुप
रस्परएकदेशमयबोधेतात्पर्यग्रहसत्वेपिएकेनप्रत्येयनैकदेशमयबोध
सायुत्सन्नत्वान्नैकदेशभयबोधापत्तिरित्यानोदूषणांतरमाह।कर्तृमात्रबो
धवदिति।बोध्यापत्तिरितिहियादिपदात्कदाचित्दिदृमान्नसकादादि एम
४५

द्यादिमात्रसबोधोत्यादवदितिभावः।।तात्पर्यग्राहकप्रकरणादेःसमानत्वा
दितिभावः।तात्पर्यग्राहकमित्यर्थः।तथाचपर्यतेइत्यत्रकस्यचित्कर्तृ
बोधेतात्पर्यसत्वेपिअनादितात्पर्याभावान्नकर्तृबोधइतिभावः।कारिका
यांतत्रेतितयोरित्यर्थकं।तयाचतयोःफलव्यापारयोर्मध्येइत्यर्थः।न
न्वेवंतडादयःकर्मद्योतकाइत्यादिव्यवहारःकथमुपपादनीयइत्यतआ
ह।फलान्वयेत्यादिनासमुदायार्थइत्यंतेन।तन्मयुद्धत्वोधकत्वरूपद्योत
कत्वासंभवादुद्ग्रहतात्पर्यग्राहयंतीति।नत्वतीनांव्याग्राहयति।तद्यगादि
समभिव्याहृतीबोध्यः।नेनैधतेइत्यादौनातिप्रसंगः।एवंतङादीनांफले
आश्रयान्वयेनीत्यग्राहकत्वेननुभावककर्मणीत्यादिसूत्रविहितनङा
दीनांकर्थकर्नरिसाधुत्वेमित्याशंक्याह।कर्मवत्कर्मणेत्यादिनासाध
नादित्यंतेन।मूलेकृत्स्नर्गायमिति।आयतेडादिःकर्मद्योतकइत्यादिःपू

वोक्तोर्थः। उत्सर्गः प्राप्तिकः नसार्वत्रिक इत्यर्थः। कुत इत्याशंकायामाह।
कर्मेति। विपर्ययात् वैपरीत्यात्। येयागमे। यथा ज्ञानस्ला यथा वा पचा।
४६ तस्य भास्यातेस्प्र। पच्यते ओदनः स्वयमेवेत्यादौ व्यापारे एवाश्रयान्व
यइतिस्पष्टयितुमाह वाच्यं न एयति। अत्राहेति। एकनारदेति। एकोयो
नारदस्तद्विषयकं ज्ञानमित्यर्थः। अज्ञानिपातेनेति। शब्दनकर्मणोभिधा
नान्न नारदान्वयोत्तरेद्वितीयेति भावः। नव्यमते तु नारद इत्याकारकंय
ज्ज्ञानं नदनुकूल इत्यादिः शाब्दबोधो बुधान्वयः। नेक्तवित्रि पानेनाभि
धानमिति नानुमन्यते तिङादिपरिगणनं स्येव भाष्यउक्तत्वात्। सकर्मकधा
तूनिति स्मिभिव्याहृतानोपादानं नेड्। लः पच्यते स्वयमेवेत्यादौ कर्मवद्
भ्रनेन भोवकर्मणोरिति नास्त्वम तिदिव्यते इति पहनि प्रसंग वारणा
य। आवेधे श्रीरुत्स्ल इत्यादावति प्रसंगवारणाय भावस्या पारणेति। यथा राम ४६

दीति। आदिना चि एव दि दू। ननु हि धायकआल इतानप्र न्य स्यतु प्रकरणा
दिक मेव तात्पर्यं ग्राहकं। एवं त्रिडादावपि वपि। अन्यथापि चेदित्यस्य कस्के
नेके भेदेणस्तु मयोरपि समानत्वात्। तात्पर्यग्राहकं दुर्भिक्षमेव स्यात्। भावना।
या अवाच्यत्वमिति। नस्याः धातुवाच्यत्वे प्राधान्यानुपपत्तेरिद वाच्यत
मित्यर्थः। व्यापाररूप भावानायाअवाच्यत्वमेवेत्यर्थ इति वाच्यता भ्रंम
यितुमिति। नयाचपललभिन्नो व्यापारोन धातुवाच्यो नापि तिङः वाच्यो
पि तिङ्वा च्योपितु फलाश्रयं धात्वर्थः इति प्रत्ययार्थइति प्राचीननै
यायिकादिमतं न सम्यगिति स्पष्टयितुं किस्य चितकथ्यिद्वदः प्रसिद्ध
त्यनेकपयोपादानं। अथवा चेतना चेतना चेतनसाधारणेन्द्रकारय
लादीनां धातुवाच्यत्वक्रियात्वयोर्बोधनार्थं तत। आणवतामेन तरू
पेण व्यापारस्य वाच्यत्वादिव॥ सर्वसिद्धइति। सर्वानुभवसि [illegible] र्थः। स

र्थानुभवसिद्धस्यापलापोनुचितइति भावः। एवं देवदत्तः पचतीति वाक्यज
न्यबोधदशायां देवदत्तः फूत्कारादिमान्नवेतिसंशयो प्यत एव नेत्यपि बो
४८ ध्यं। एवं च उक्तप्रकारेण फूत्कारादिव्यापारेणोपाध्यते। गौरवापत्ते नि
फूत्कारत्वादीनामुपाधिस्वरूपत्वात् तदवच्छेदकमिति। प्रवृत्तित्वस्वरूप
तित्वमिष्टसाधनताज्ञानकर्मतावच्छेदकतया सिद्धो जातिविशेषोनन्त
देवाख्यातस्य प्रयत्नावच्छेदकं लाघवादिति भावः। तथा च फलं धात्वर्थोप
न्न आख्यातार्थः इति मतानवैयायिकमतेपर्यवसन्नं। फलत्वं धात्वर्थ
क्यतावच्छेदकमिति तु नयः। तथा सति प्रत्ययस्याप्यर्थकतापत्तेः। त
च्चनैयायिकाभिमतं। अत एव कालस्य व्यापारे वृत्त्युक्तौ व्यानेत्त
पि नैयायिकानभिमतत्वात्। धातुवाच्ययत्नस्य प्रत्ययमात्रेणान्वयानाप
तेश्च। नामार्थे धात्वर्थे धात्वर्थेतिव्युत्पत्तिविरोधात्। ततः कर्मणि नित्य राम
४८

ऽविरोधात्। उरयोगवृत्तीत्यादौ यत्नस्य वा धातव्यापारदिष्यतीः सर्वा
नुभवसिद्धः कथं निर्वाह्यत आह अरयोगवृत्तीति। जानातीत्यस्य देवद
त्तइत्यादिः शेषो बोध्यः। आदिपदात् इच्छति नश्यतीत्यादिपरिग्रहः।
व्यापारत्वादीत्यादिना आश्रयत्वत्वप्रतियोगित्वपरिग्रहः। घटो नश्यती
त्यतो नाशानुकूलव्यापारस्य नाशाश्रयत्वस्य च प्रतियोगिताया धात्वर्थत्वे
योगित्वमेव तत्र भासत इति बोध्यं। एवं च अरयोगवृत्तीत्यत्रापि व्यापारभान
मितिनसाधुगमनानुकूलनोदनादिमत्येकत्र स्थितेपि चैत्रादौ चैत्रो गच्छ
तीति प्रसंगात् गुरुत्वेपि संभवादिति। शक्तिलक्षणयोरुभयोरपि पदत
दर्थसंबंधत्वाविशेषद्गुरुधर्मावच्छिन्ने लक्षणयापूर्वोक्ते रपि संभवा
दित्यर्थः वैषम्ये बीजाभावादिति निनुकारणतावच्छेदकत्वप्रतियोगिता
वच्छेदकत्वव्यवच्छेदकतावच्छेदकत्वस्वरूपसंबंधविशेषरूपसंभवति ल

लघुधर्मे गुरुत्वेन कल्प्यते। अत एव लघुधर्म एव कारणतावच्छेदकताप्र
तियोगितावच्छेदकता च कल्प्यते अत एव प्रमेयधूमो नास्तीति प्रती
४८ तिसिद्धाभावप्रतियोगितावच्छेदकत्वं प्रमेयत्वविशिष्टधूमत्वेनास्तीति
ताकिंकसम्प्रदायः संगच्छते। अत्र संभवतीत्यस्य संभवत्तदवच्छेदकताकं
इत्यर्थः। तथा च संभवत्तदवच्छेदकताकधर्मापेक्षया यो गुरुः सन् तदनव
च्छेदनवच्छेदकताक इति व्याप्तिः पर्यवसिता। संभवत्तदवच्छेदकताकत्वं च
तदवच्छेदकत्वबाधकशून्यत्वं बाधकं चावच्छेद्यप्रतियोगित्वाद्युपसर्जने
यत्वं। न चैतत्समनैयत्यमेव संभवत्तदवच्छेदकताकत्वं। समनैयत्यन्तु
टकदलद्वयनिवेशेन घटपटान्यतराभावमहानसीयवह्न्यभावप्रतियो
गितावच्छेदकत्वं घटत्वं वह्नित्वापेक्षया गुरोरपि तादृशान्यतरत्वमहा
नसीयवह्नित्वादेर्निर्वहति। प्रति। प्रतियोगितायाः समनैयत्यं च तदन्यू रम

४८

नवृत्तित्वे सति तन्निरूपकाभावविशेष्यितावच्छेदकत्वं अतो गुणकर्मा
न्यत्वादिविशिष्टसत्ताद्यभावप्रतियोगितावच्छेदकत्वस्य न सत्तात्वसमनि
यतत्वादृशविशिष्टसत्तात्वेनुपपत्तिः। ज्ञाप्यतावच्छेदकत्वमेव स्वरूपसंब
न्धविशेषेण तद्व्याप्यतावच्छेदकत्वमिति चेन्न। स्वरूपसंबन्धस्य तत्स्व
रूपस्य गुरुधर्मस्वरूपाणामपि सत्वान्नद्वारेणासंभवात्। किंच गुरुधर्मे
षु वच्छेदकत्वास्वीकारे तदभावस्वीकार आपत्ति तन्नद्वारमवच्छेदकत्व
स्वीकार एवं भावकल्पनायां लाघवात्। अन्यत्र क्लृप्ताभावस्य संबन्धमा
त्रेकल्पने लाघवादिति चेत्। अन्यत्र कल्प्यमानावच्छेदकत्वस्य सं
बन्धकल्पनैव युक्ता। गुरुधर्मो अन्यूनानतिरिक्तवृत्तित्वरूपावच्छेदक
त्वस्यानपायाच्चेति निरुक्तदूषणादितो वेदितव्यं। यत्तार्थककरोतीति नेति।
यत्त्वजन्यत्वाजन्यत्वप्रतिसंधानदशायां पठांकुरयोः कृतारुत व्यवहा

एतत्तस्य यत्नार्थकत्वम्। वृत्त्युक्तमिति भावः। रथो गमनमिति। रथप
४८ दस्यानुकूलगमनानुकूलकृतेश्चैत्रादिसंमतत्वेनायाः सत्वात्तादृशप्र
योगानुपपत्तिरेतादृश इति। अंकुरः कृत इत्येतावन्मात्रस्येश्वरकृति
जन्यत्वमादायोपपत्तेरहेतुत्वादिनेति विवरणं इति। इदमुपलक्ष
णं किं करोतीति यत्नप्रश्नेऽपि चैत्रात्तरस्य यत्नार्थकत्वं विनानुपपत्ते
श्चेत्यपि द्रष्टव्यं। यत्नार्थकताया अप्रसिद्धेरिति निर्वर्त्य योगमनं करोती
त्यादौ करोतेर्व्यापारसामान्ये लक्षणेति ध्यानं। मुख्यार्थे लक्षणेति
लक्षणाकल्पनमनुचितं न्याय्यत्वादिति भावः। ननु व्यापारवाचकत्वे य
त्नत्वाजन्यत्वप्रतिसंधानदशायां परः कृतः अंकुरः कृत इति व्यव
हारानुपपत्तिर्व्यापारजन्यत्वप्रतिसंधानविशेष्यत्वात्। यद्यपीश्वरीय
कृतिजन्यत्वेऽपि चैत्रादिकृतादृशकृतिजन्यत्वाभावविशेषणानुदृशा राम
४८

यां नादशायां व्यवहारस्येष्टत्वात्तदुक्तमाचार्यैः। कृतविभागेन कर्तृरूपव्य
वस्थया। यत्न एव कृतिः पूर्वा परस्मिन् सैव भावनेति। यत्ने तत्र कृत्रोप
रस्मिन्मते मीमांसकमतेनेत्यर्थः। निरूढलक्षणा एवं कल्पे इदस्य कृ
जापीति चेन्नाप्रवाहत्वेति त्वावच्छिन्ने एव शक्तिरस्तु व्यापार एव ल
क्षणास्तु लघुधर्मावच्छिन्ने एव शक्तेर्मीमांसकादिमतसिद्धत्वा
त्। लक्षणया बोधयतस्तदजन्यबोधविषयत्वप्रकारकप्रवृ
त्तिप्रयोगाः समाप्तविषयिण्यास्तत्राकार्यकत्वेऽपि लघुधर्मावच्छि
न्ने एव संचयत्वमंगीक्रियते न गुरुधर्मावच्छिन्ने अनुभववलेनेगार
वज्ञानस्य प्रतिबंधकत्वकल्पनात्। वाक्यसंबंधरूपलक्षणा यास्तु तत्रा
पि संबंधत्वं कृत्तनकल्पमिति विषम्यमत एव न लक्षणे बोध इत्ति संक
ल्पतांत्रिकसिद्धमित्यत आह। किं च माधनायाइति अवाच्यत्वे। व्यापार रू

पभावनायाः धातोस्तिङ्स्याद्यवाच्यत्वेद्वितीयायास्यादितिनिरासाअवाच्य
त्वेस्वजनकव्यापारव्यधिकरणधात्वर्थफलाश्रयत्वंवक्तव्यं धात्वर्थफ
५० लाश्रयत्वमेववा।एवंच घटंभावयतीत्यत्रैवघटोभवतीत्यत्रापिघटप
दाद्वितीयापत्तिः उभयत्रापिघटस्यधात्वर्थोत्पत्तिरूपफलाश्रयत्वाविशे
षादित्यर्थः।कर्मसंज्ञायावाध्यादितिघटस्यफलाश्रयत्वेपिद्वितीयाप्र
योजककर्मसंज्ञाविरहान्नाद्वितीयापत्तिरित्यर्थः।अनुगतेति।चैत्रमस्ता
धारणेत्यर्थः।घटस्याकर्तृत्वमुपपादयति।फलाश्रयत्वस्येति।तदुत्पादिं
र्थफलानुकूलतत्कृत्याश्रयत्वस्य।कारकेति।प्रकृतधात्वर्थकाचकाकर्तृत्व
र्थः।अभावादिति।अचेतनत्वात्कारकचक्रप्रयोक्तृत्वाभावादिति भावः।तथा
चकृत्यादिमत्त्वएवकर्तृसंज्ञा।प्रधानात्कृत्याद्यभावेकर्तृसंज्ञाप्रसक्तावे राम
नकर्मसंज्ञायाअनपवादाद्वितीयापत्तिर्दुर्वारेतिभावः।ननुधात्वर्थानुकू ५०

लव्यापाराश्रयत्वंस्वतंत्रपदेनविवक्षणीयंतच्चघटेऽवाधितमेत्यतआह
।धात्वर्थेति।कारकमात्रस्येति।कारमात्रेप्रकृतधात्वर्थानुकूलव्यापारव
त्वात्सर्वकारकेषुअतिप्रसंगः।ननुकारकचक्रप्रयोक्तृत्वंतच्चैवस्थिकम
नानातिप्रसंगः।अतएवस्थालीपचतीत्यपिभवतिस्वस्त्वंचैवंकारकेष्वति
सत्रभाष्यइत्यतआह।अपिचेति।अप्रमतावतिप्रसंगनिवारणायधात्वर्थफ
लव्याधिकरणेति।।अप्रमतेरपिपक्षादित्वर्थफलव्याधिकरणव्यापा
रवत्त्वादतिप्रसंगतादवस्थ्यमतःस्वार्थत्वेफलानिवेशितं।फलव्यधि
करणत्वंचफलतावच्छेदकसंबंधेनयत्तुकिंचित्ततत्फलाधिकरणभि
न्नवृत्तित्वं।[illegible]वृत्तित्वं।नातोगम्यादेरसंग्रहः।फलतावच्छेदकसंबंध
निवेशान्नअप्रमत्यर्थफलस्यकालिकादिसंबंधेनयदधिकरणंकालादि
तद्वृत्तिस्वजनकव्यापाराधिकरणत्वस्यापिनातिप्रसंगः।चैत्राभावयत्रनिष्टसंघो

मू०सं० ग्यन्तव्यधिकरणतावच्छिन्नप्रतियोगिताकभेदस्य चैत्रेऽसत्त्वाद्गम्यादेर
संग्रहस्तदवस्थ इति यत्किंचित्तन्तत्फलव्यधिकरणं निवेशितं। यद्वा फलाधिक
२ रणारण्यत्किंचिद्वृत्तित्वं फलव्यधिकरणत्वं विनिगमनाविरहाद्दास्वार्थव्यापारेति।
व्यापारव्यधिकरणवृत्तितत्फलकत्वं फलव्यधिकरणत्वं स्वत्वाद्यर्थो व्यापार
ः॥ स्वाधिकरणत्वं व्यापारतावच्छेदकसंबंधेन बोध्यं नातो ग्रामस्य कालिक
संबंधेन चैत्रवृत्तिव्यापारत्वे प्रसक्तिः। तद्वृत्तित्वं च फलतावच्छेदकसंबंधेनाते
न नाकर्मकेति प्रसंगः। वाच्यत्वं धातुवाच्यत्वं। अन्यतममित्ति। [illegible]
नाभिन्नायावंतो धातवस्तद्वत्यन्यतमत्वमित्यर्थः तच्च तत्तद्व्यक्तित्वानुपूर्वत्वावच्छिन्नप्र
तियोगिताकभेदसमुदायवच्छिन्नत्वं एकस्यैवेति। एकानुपूर्वकस्यैवेत्यर्थः। ते
न भारं वहति नदी वहतीति वाक्यद्वयघटकवहधात्वोरुच्चारणभेदेनार्थभेदा
वश्यकत्वेन एकस्यैवत्वसंगतमिति निरस्तं। यद्वा आर्थभेदास्त्वपि प्रागुक्तभेदमते सम
५१

इदमिति बोध्यं। एवं च सकर्मकत्वेनाभिमतधातूनां तत्तद्व्यक्तित्वावच्छिन्नप्रति। यो
गिताकभेदानामन्यतमत्वरूपभेदप्रतियोगितावच्छेदककोटौ प्रवेशेऽपि न निस्तार
इति बोध्यं। ननु सकर्मकत्वस्य जनकव्यापारव्यधिकरणफलवाचकत्वेन तच्च करोतेर
स्त यत्नस्य फलनावच्छेदकविषयतासंबंधेन स्वजनकात्ममनोयोगादिरूपव्यापा
रान व्यधिकरणवृत्तित्वात् न इभिन्नत्वम कर्मकत्वं तच्च करोतेर्नैव संभवतीत्य[illegible]क
र्मकतापत्तेरित्यसंगतमित्याशंक्याह। यत्न अयं भाव इति। अर्थ इति। अस्य धातोरित्या
दिः। यत्नो भयत इति यदिति। तथा च तादृशरूपस्य कर्मकत्वं च कृञ्चितन धातावति
प्रसंगात् अपितु स्वार्थफले स्वाप्रयुक्तमेवास्मदीयास्मरीत्या फलविशिष्टव्या
पारवाचकत्वमेव। तच्च करोतेर्यत्नमात्रवाचकत्वेन संभवतीत्यकर्मकतापत्तिर्दुर्वारैवे
ति भावः॥ ननु धातुमात्रस्य व्यापारवाचकत्वे धातुमात्रस्याकर्मकतापत्तिः संभवा
त्कथमिति चिंत्रो षोऽकरतु चिंत्येत्याशंक्याह॥ कृत्रर्द्र इति। फलवाचकत्वं सकर्मकत्व

मित्यभिप्रेत्याह। सकर्मकभेदेति। तथा च सकर्माकर्मकविभागोच्छेद इति नात्ययं
। नतु सकलधातुवाच्यत्वं एतेन व्यापारो भावनेति कारिकोपात्तव्यापारस्य धातुवाच्यत्व
५२ साधनेपि फलांशस्य तदसाधनेन न्यूननेति दूषणं प्रत्युक्तं॥ रूढ इतीति। यत्नो न य
लडिति व्यधलार्थकतायामकर्मकतापत्तिरित्यर्थः अन्यथा वायुर्विकुरुते सैंधवा विकु
र्वते इत्यादि प्रयोगदर्शनापत्त्या श्रुतेऽसंगत्यापत्तेः। ननु फलवाचकत्वेपि फलव्य
धिकरणव्यापारवाचकत्वं कर्मकत्वं स्वआदेरपह्नतमेव उत्पत्त्यादिरूपफलव्य
धिकरण। यत्नात्मकव्यापारवाचकत्वादित्याशयेनाह अयं भाव इति। [illegible]इति
सकलधात्वर्थ इत्यर्थः। सकर्मकत्वोच्छेदापत्तिरिति। समनंतरोक्तं नसकर्मकत्वं मा
श्रयितुमर्हतीति स्पष्टयति व्यापकत्वादिति भावः॥ ननु सकर्मकत्वव्यवहारानुपा
दस्तु पच्यादेः फलांशोपि वाच्यः। अत एव धातोर्व्यापारमात्रवाचित्वे फलं हि ती
याद्यर्थो वाच्यः तथा च प्रयागात्काशीं गच्छति चैत्रे प्रयागं गच्छति चैत्रः काशीत्यज राम

५२

कइति चेतीत्यपि प्रयोगस्यात्। एवं ग्रामं स्पंदते इति प्रयोगापत्तिश्च॥ एकस्यैव व्याप
रस्य गम्यादिवाच्यस्य पूर्वापरदेशाभिन्नविभागसंयोगजनकत्वात् नितं फलविशेषा
न्वयबोधेतत्तद्धातुजन्योपस्थितेर्हेतुत्वकल्पनया उक्तप्रयोगापत्तेर्वारणेनुगौरवं॥
त्यजिगम्योः पर्यायताभ्रमदर्शनाद्यो गच्छति ग्रामं त्यजति ग्राममिति वाक्यद्वयाद्य
विलक्षणबोधोत्पत्त्यात तथाविधहेतुमत्त्वावकल्पनमनन्यच्यं च [illegible]ते
तुषीयत तथाविधभ्रमस्यन्यवालिकतत्तु पायततत्फलान्वयबुद्धित्वस्य का
यतावच्छेदकत्वं स्वीकृत्य व्यभिचारवारणे तु निर्गौरवं तथाविधभ्रमदर्शनाया
भपिनादगन्वयबोधानापुते पेत इति न युक्तं अनुभवसिद्धस्यापलापान
र्हत्वात्। एवं त्यजति गच्छतीत्यागोगमनमिसतोप्याविलक्षण एव बोधापत्तिः। न चात्र
फलविशेषावच्छिन्नव्यापारे लक्षणास्वीकारेणोक्तापत्तिरिति वाच्यं। अनेकक
र्मप्रत्ययानां तत्तत्फलविशेषेशक्तिकल्पनो कर्मप्रत्ययासमभिव्याहृतग।

म्यादिस्तु तत्फलावच्छिन्नेत्यलक्षणाकर्मतां चापि गम्यादेरेव विशिष्टवाचकत्वेनो
५३ चितत्वात्। एवं पक्षे तेन तदुक्तः स्वयमेवेत्यादिप्रयोगानुपपत्तिश्च फलस्य धात्व
वाच्यत्वे कर्मसंज्ञिकयकत्वाभावेन कर्मवद्भावाप्राप्तेः। फलकर्त्रन्वयितत्वं निर्वक्तुं भ
ग्नेपि तत्प्रवेशावश्यकत्वादित्येषाणामनवतार एव। तथा च पच्यादेरुक्तरीत्या
फलावच्छिन्नव्यापारार्थकत्वेपि क्रियार्थत्वादिरूपव्यापारमात्रार्थकत्वे बाधका
भावः तत्र सकर्मकत्वव्यवहारं कर्मान्वितार्थकत्वनिमित्तको गौणः। एवं तत्र धात्वर्थ
तावच्छेदकफलशालित्वरूपमुख्याकर्मत्वविरहेपि विषयत्वरूपस्य गौणस्य कर्म
त्वकर्मत्वसंभवतीत्याशंक्याह नच कर्मादाविति। लकारासंभवादिति। गौणमुख्य
योरिति न्यायादिति भावः। नदेवदर्शनेन द्रढयति। नहीति। उत्पत्त्यनुकूलयत्नार्थ
कत्वेकर्त्रोनोक्तदोषसंभवइत्यतआह एवं चेति। यत्नमात्रमिभीतिः मात्रपदेनोत्प
त्तिनिरूपकत्वव्यवच्छेदः। तथा च पराभिमतयत्नमात्रार्थकत्वं निषिध्यते उत्प राम
५३

त्तिविशिष्टयत्नार्थकत्वं तु स्वाभिमतमेवेति भावः। अत एव। यत्नपदस्य तन्मात्रपर
त्वादेव। अन्वयोत्पादस्यादृष्टत्यनुकूलयत्नाद्यर्थकतया संगतिस्त्वष्टेवेति भवतु
पदं भक्तत्वा। यत्नादीत्यादिपदेनवाह्यव्यापारस्यापि परिग्रहः। बीजादिनांकुरः कृत
इत्यपत्युरोध्यान्। तत्र यत्नवाध्यात्यागोपिन्नान्तेयेवेतरव्यापारभानमिति भावः। अन
नुग्रस्य यार्थफलव्याप्तिकरणव्यापारवाचित्वं मकर्मकत्वमस्तु प्रत्ययार्थफला
श्रयत्वमेव कर्मत्वमतो न कश्चिद्दोष इति चेन्न। घटं भावयतीत्यादौ फलस्यान्वय
यव्यतिरेकाभ्यां प्रकृतिभूतधातुवाच्यत्वे सति गौरवान्न्यानाभावाच्च तस्य प्रत्य
यार्थत्वाभावेन तत्र लक्षणद्वयस्याप्यव्याप्तेः। किंच फलस्य प्रत्ययार्थत्व
पचतीत्यादौ फलविषयकबोधानापत्तिरिति दिक्। युक्त्यंतरमाहेति। मुख्यभा
क्साधारणकर्मत्वान्वितस्वार्थबोधकत्वमेव सकर्मकर्मत्वाज्ञानमनुगमेपि कर्म
त्वपदवत्वेन तेषामनुगमः। गौणेपि कर्मत्वेपदं जानातिकरोतीत्यादिप्रामाणि

५४ कप्रयोगानुरोधाद्द्वितीयादपदः । यथा न्यायाद्धिकमते आरोपितकर्तृत्वादिकमादायत
तीद्दयः । अत एव स्रग्गोनयावणदृत्यादिसंगच्छते । अत एव चकारकचक्रप्रयोगस्त्वं
क्तेत्वमिति भाष्यमते घटो भवतीत्यादिप्रयोगनिर्वाहः । न च कारकाधिरेगौण
मुख्यन्यायाप्रवृत्तेः सिद्धं न सिद्धं न यादिति यादिसद्भावेपि तत्र लकारापत्तिर्दुर्वा
यतेऽक्रियते घटइत्यादिप्रयोगासिद्धिरेवेति वाच्यं । स्वरितत्वप्रतिज्ञया अधिक
ःकारोऽधिकं कार्यमित्यर्थकस्वरितेनेति सूत्रेणैतेषामपि सिद्धेः । धातुविशेष
जन्यत्वाद्युपस्थितेर्द्वितीयाद्यर्थविषयतान्वयबोधे नियामकत्वात् अध्य
दायतयनतद्वृत्तिवक्रव्येघटं यततद्द्व्यादयः प्रयोगाः अस्तु वा तत्र विषय
यतैव फलं तस्या अपि ज्ञानादिप्रयोज्यत्वरूपफलत्वसत्वात् तत्र च मुख्यमे
व कर्मत्वमिति निर्गलत्वन्यायावतारोपि । अथवा पाणिन्यादिसंकेतसंबंधेन क
र्मपदद्योत्यप्यर्थकत्वमेव सकर्मकत्वं एतद्वैतज्ज्ञास्त्रीयकर्मसंज्ञकार्यात्व राम
५४

प्यर्थकत्वमुच्यते । एतच्च भवतो व्याख्यकं अत एवाध्यासिता भूमयइत्यादि
सिद्धं । अन्यथा स्वार्थफलेसादेस्तत्साधारण्याभावेकर्मणि प्रत्ययानुपपत्तेः
इत्यतो युक्त्यंतरमाहेत्यर्थः तुनु वचनामावात्कर्मकर्त्तरिकर्मवद्भावाप्रकृतावप
पीति मूलमनुपपन्नमित्यत आह । कर्मवत्स्यादिति पदेनेति । सूत्रस्थत
दिति । सूत्रविहितमित्यर्थः अन्यथा यगादीत्यनेनान्वयापत्तेः । कार्याति
देशपक्षे सोत्पादितवत्सूत्रविहितत्वं यगादेः । शास्त्रातिदेशपक्षे तु परंप
येति बोध्यं । तन्त्रस्यादिति । कर्मस्थक्रियया तुल्यक्रियाफलसमानाधिक
रणव्यापाररूपार्थाय अनादरकर्तृकर्मवदित्यर्थकस्य कर्मवत्कर्मवत्कर्मणे
तिसूत्रसाप्रापतेः । तत्र फलवाचकत्वाभावात् । तदर्थयत्नसत्तुघटादिसम
वेतत्वाभावात् । तत्र कर्मस्थभावेदूपापतिस्तु पचनप्रकृतत्वत्र भाष्यविरो
धात् । ननु कर्मणि समवायेनयत्नस्यासत्वेपि विषयतया तत्क्रियत्वमस्तु ।

मेवं अत एव घटं जानातीत्यादिवद्घटं करोतीति प्रयोग उपपद्यते फलतावच्छेद
५५ कविषयतासंबंधेन ज्ञानादिवैशिष्ट्यस्य घटनिष्ठतया तस्य कर्मत्वात्। न चै
वं घटं पटं यजतत्रत्वपि स्यादिति वाच्यं तदुपस्थितयत्नस्य विषयतया फलता
त्वव्यवहाराभावेन विषयतायाः फलतावच्छेदकतानंगीकारादेवं चाक्रि
यते घटः स्वयमेवेत्युपपन्नमेवेत्याशयं क्वचिद्बध्यते घटः स्वयमेवेत्यादिप्र
योगापत्तेरित्याशयेन मूलोक्तं दृष्टांतमुद्धपयादयति यथादह्यते घ
ट इति। एवं फलव्यधिकरणत्वादेरेव सकर्मकत्वरूपत्वे। विषयावच्छि
न्ने। अवच्छेदकतासंबंधेन। विषयनिष्ठ आवरणभंग इत्यर्थः भंगादीत्या
दिपदेन ज्ञाततादिविषयतापरिग्रहः। किं तस्यादिति। तथा च फलव्यधिकरण
त्वादिरूपसकर्मकत्वमपि स्वीकारयोग्यं न भवतीति तात्पर्यं। मानो यं दोष इति
नान्यतरमते आपादनात् किं चेगम्यते ग्रामः स्वयमेवेत्यादिप्रयोगापत्तिरूपा। २

५५

पि दोष इत्याह। एवं ग्राम इति। निर्वर्त्यादिस्वरूपज्ञानार्थमाह। इष्टिन भिन्नेति वनह
भिन्नकर्मण आधिक्ये पि न क्षतिः। क्रियाकृतविशेषेति। क्रियाकृतविशेषेण त
इत्येनानुपलभ्यमान इत्यर्थः। यद्वा ऽनुपलभ्यमानः क्रियाकृतविशेषो यस्मिन्निति बहु
व्रीहौ राजदंतादित्वादिना विशेषणस्यापि परनिपातः। वक्ष्यत इति क्रियाकृतवि
शेषाणामसिद्धिर्यत्नेन गम्यतो दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यत इति वाक्य
पदीयादिति वक्ष्यत इत्यर्थः विषदष्टसर्पदष्टेषु पिमूर्च्छादिरूपो विशेषो दृश्य
ते तथापि न संबंध। तथा च यद्धात्वर्थफलनिष्ठो यः क्रियाकृतविशेषोपलंभाभाव
स्तद्धातुकर्म प्राप्यकर्मेति पर्यवसन्नं॥ नोक्तातिप्रसंग इति तद्धीजंतु कर्मवत्कर्म
णेति सूत्रे कर्मणेत्युपादानात्कर्मस्थक्रियाणां कर्मस्थभावकानामेव धातूनां ग्रहणं
किं कर्मग्रहणं विनापि अंतरंगत्वात्प्रकृतधात्वर्थाश्रयकारकेणैव तुल्यक्रियत्वला
भेन साध्यसिद्धिरिति चेन्न अतिप्रसंगवारणात्। कर्तृभिन्ने च प्रकृतधात्वर्थाश्रयीभूतं क

मैवेति भावः। क्रियाव्यवस्था चेत्युक्ताभर्तृहरिभिः विशेषदर्शनं यत्र क्रिया तत्र
व्यवस्थिता। क्रियाव्यवस्थात्वन्येषां शब्दैरेव प्रकल्पितेति। इत्थं हि स्पन्दकरवाचि
५६ ः। नन्वेवं चिंतयति पचयत्यादौ णौ कर्तरि क्रियाकृतविशेषानुपलंभात्कर्तृत्वस्य भा
वकतानुपपत्तिरतः सिद्धांतिमानमाह अन्येषामिति। मतद्वृत्तिशेषः। यत्र कर्तृ
कर्मभयस्य व्यापारफलोपाधेन प्रतिपाद्यते स कर्तृस्याभावकः। यथा पचन्त्या
ति घटं ग्रामं गच्छतीत्यादौ। ज्ञानरूपफलस्य समवायविषयतासंबन्धाभ्या
मुभयनिष्ठत्वात्। संयोगस्य चैव समवायेनोभयनिष्ठत्वं। एवं हासत्त्वापि च्छिन्न
वृत्तिविशेषस्योभयनिष्ठत्वं। अत एव ज्ञानानेरूपव्यरणभंगो घटस्य कर्तृव्यापा
रार्थकत्वं कर्तृकर्तृस्य क्रियकतानापत्तिः। कर्मस्य क्रियकतापत्तिश्चेति
ज्ञानानुकूलव्यापारार्थकत्वमेव स्वीक्रियते। यत्र तु कर्तृवृत्ति फलं सकर्म
स्याभावकः। यथा मिनतीत्यादौ न हि हि धा भवनादिकं कथमपि कर्तृगतं राम
५६

प्रयंतीति हेलाराजद्रुत्यन्यत्र विस्तरः। धोनीः फलवाचकतासाधिकामन्ये
षां युक्तिमाह। धातूनामिति क्रियावाचकता विशेषात् इति। एकजातीयः
क्रियावाचकता विशेषादित्यर्थः। अत एव धातुमात्रस्य पर्यायतापत्तिर्नेकु
ता। अपि वृद्धतीत्यनेनास्वरसः स्वचितः तद्धृतीयत्नानंतफलवाचेत तद्धातुज
न्योपस्थिते हेतुत्वकल्पनया प्रयोगं त्यजनीति प्रयोक्तव्ये प्रयोगं गच्छतीत्या
दिप्रयोगवारणं सुकरमिति। निर्विवादमिति। भवतीत्यादिनः सत्ताद्यवोध
स्य सर्वमतसिद्धत्वादित्यर्थः। पचतीत्यादितए फलवाचे विवादः तत्र फ
लवाचो द्वितीयादितएवेति पराभ्युपगतत्वात्। अमएव। धातोः फलवाच
कतादेव। संगच्छते इति। तंडुलानौदनं पचतीत्यत्र तंडुलानो विकार्यकर्म
त्वं ओदनस्य निर्वृत्यकर्मत्वैकत्वमभिमतं न्निवाहार्थमुत्पत्ति विक्लित्तिरु
पफलद्वयार्थकत्वपर एवसमाधेयं यः। एकस्यैव व्यापारस्योक्तफलद्वयजं

नकत्तृत्वयाव्यापारद्वयपरत्वेऽसंगतिःसंदेहेत्ति भावः।नन्वेवंमानाल्या
५८ देःसकर्मकत्वाज्ञानाद्यनुकूलव्यापारवाचित्वंवाच्यंतथाचक्षुरादिकंजा
नातीतिस्यात्।चक्षुरादावपिज्ञानानुकूलचक्षुर्मनःसंयोगादेःसत्वादिति
चेन्न।स्यात्तीपवृत्तीतिवदिष्टापत्तेरित्याशयेनाह।द्विगितिपूर्वोक्तयुक्तिभि
ःफलव्यापारयोर्वाच्यत्वेसाधितेतिङःप्रत्ययवाच्येवभावनेतिमंडनमि
श्रानुयायिमतमात्रंव्युनिराकृतं।एवंसिसिध्यत्तिसादिना।नह्यागमे
हीति।शाब्दबद्धपलभ्यतेतदागमेहितहृश्यतेतस्यज्ञानंयथान्येषामिति
जैमिनिसूत्रे।पञ्चुनायजेतेत्यत्रैकवचनेनोपात्तैकत्वस्यकरणत्वेननक्रि
यायामन्वयःकिंतुप्रकृत्यर्थप्रत्ययानांप्रकृतत्वयोरित्तेरितिस्वीकारेण
कृत्वस्यघागांगत्वाभावात्तद्भावेपियागावैगुण्याद्विवक्षितत्वमेवस्या
दितिपूर्वपक्षेहेतुद्दसूत्रंतदर्थास्तुशब्दवत्अशब्दवत्तन्नादेवोध्यया। राम
५८

याभवतितथोपलभ्यतेएकत्वंहियतस्तदागमेएकवचनश्रवणाद्दृश्यतेतस्त
स्यांगत्वज्ञानंयथान्येषांपश्चुत्वलौहित्यादीनामिति।तथाचविशिष्टस्यश्रुत्या
पंतबोधनेनपश्चुत्वादिवत्स्वरूपबोध्यस्यास्यविशेषणस्यांगत्वापपत्तिरितिभा
वः।एवंचतत्रयथाएकवचनागमेएकत्वंदृश्यतेऽतस्तदर्थत्वमेवंपचतीत्या
दावाख्यातश्रवणेप्यस्तिव्यापारबोधात्तस्यतदर्थत्वमेवांगीकार्यमन्यथोप
विरोधापत्तेरितितात्पर्यं॥तथाचोक्तंभट्टपादैः।तथाकर्मवतोर्नित्यंप्रकृ
तिप्रत्ययार्थयोः।प्रत्ययस्त्वनितिवेलायांभावनात्वावगम्यतेइति।नन्वेवंसर्वा
त्मसकर्मकत्वाकर्मकत्वविभागोच्छेदः।व्यापारस्यधात्वर्थत्वाभावादाएवं
देवदत्तःपचतीत्यादौधात्वर्थव्यापारश्रयत्वरूपकर्तृत्वस्यदुर्वचत्वेनदेव
दत्तादेःरूपकर्तृत्वप्रत्ययार्थत्वेनस्यादित्यतःसकर्मकत्वादिकमन्यादृशमाह
एवंचस्वयुक्तेति।सप्तकृतधातुः।भवत्यादेरपिपच्यादियुक्तारव्याता

र्थव्यापारव्यधिकरणफलवाचकत्वात्सकर्मत्वापत्तिरतः स्वयुक्तेत्या
५८ ख्यानविशेषणं। योगश्च साव्यवहितोत्तरवर्तित्वं। तेन देवदत्तः पचति भ
वति घट इत्यत्र पच्युत्तराख्यातस्य भूध्वानुत्तुयुक्तत्वेपि नातिप्रसंगदव
स्य्यं। स्वोत्तरवर्तित्वमात्रनिवेशे घटो भवति पचति देवदत्त इत्यत्र भूधा
वतिप्रसंगः। अव्यवहितोत्तरवर्तित्वमात्रनिवेशे अतिपपातेनद्भ घट
कातिपच्योः संग्रहेपि पचति अस्त्यतीत्येतत्समुदायघटकयोस्तयोरु
संग्रहः अतो द्वितीयदलप्रवेशः। तेन घटं भावयति ग्रामं गमयतीत्यादौ
भवत्यादेर्णिजर्थव्यापारव्यधिकरणोत्तरत्यादिफलवाचकत्वसत्वाना
संग्रहः। उत्पत्त्यादिवाचकत्वं प्रकृतिभूतभवतीरेवन एवं तत्सत्ति एवं तस्य
सकर्मकत्वाभावे भाव्यते घट इति एयंतात्कर्मणि लकारानुपपत्तिरिति
नवाच्यं। स्वस्वघटकान्यतरत्वानिव्याप्यकत्वरूपस्य नेहाचकत्वस्यनि राम

५८

वेशेनादोषात्। तद्घटकभूधातौ नातिप्रसंग इति तु नव्याः वयं तु प्रापतेः। एवं स्व
युक्तप्रयार्थव्यापारसमानाधिकरणफलवाचकत्वमकर्मकत्वं स्वयुक्त
प्रत्ययार्थव्यापारजन्यफलाश्रयत्वं कर्मत्वमित्यपि बोध्यं।। कर्तृत्वं वाव्य
मिति यथा देवदत्तः पचतीत्यादौ देवदत्तादेः। वैवोमे वेणपाचयतीत्या
दौ प्रयोज्यप्रयोजकयोर्जैः राधिणिजर्थस्यानायाश्रयत्वात्कर्तृत्वं। दे
वदत्तेन पच्यते देवदत्तेन सुप्यत इत्यत्राप्याख्यातार्थव्यापाराश्रय
त्वाद्देवदत्तस्य कर्तृत्वं। इत्यादौ त्यादिपाद्ददुत्काकर्मकवत्वहणादि संग्र
हः। मीमांसकमन्यमिति आत्मना मेवमन्नेति एव न्याः अनेन मावना मुख्यवि
शेष्यको बोध इति सूचितं। गमनवानिति प्रतीत्यापत्तिरिति। फलव्या
पारयोर्धात्वमतेपित्तदाय व्यधिकरणेति अंतरंगत्वात्फलस्य व्यापारे
एवान्वयांगीकारानूरिति तु नव्याः वयं एवं गमनं नन संद इति प्रयोगापत्तिश्च

वोध्या।संयोगाश्रयत्वादिति॥अस्मान्नामस्येत्यादिः।ननु कर्मणः कर्तृत्वविव
५६ क्षायां तादृशप्रयोगापत्तिः सिद्धान्तेपीति चेन्न। कर्मादेरेव कर्तृत्वविवक्षाया
मपि तदापत्तिरित्याशयात्। फलमात्रार्थकानां तन्नानाधिकरणव्यापारार्थ
कावच्छिन्नत्वस्यादेरनभिधानादिति भावः। व्यापारविगमे व्यापारनाशोद्देशापत्ति
श्चेति। धातोर्व्यापारवाचकत्वे पाकाद्यर्थः फलमेव वाच्यः तथा चोक्ताना
पत्तिरुक्तापत्तिश्चेति भावः। फलानुत्पाददशायां फलकर्तृकसत्ताया वर्तमा
नत्वाभावात्। व्यापारविगमेपि फलकर्तृकसत्ताया वर्तमानत्वाच्चेति भावः।
पचेर्विक्लित्तौ पचतीत्यानापत्तिस्तदापत्तिश्च न संभवति मतत्यागार्थे व्यापारे
एव समानाभिधानश्रुत्या तदर्थकालान्वयोपगमात्। उक्तदूषणोद्धारं तदु
क्तं निराकुरुते। यत्त्विति। नानुपपत्तिः। उक्तदोषाणामनवकाशादेतन्मना
नुपपत्तिर्नेत्यर्थः। कर्त्राख्यानवदिति। याथार्थ्यतः कर्मणीति सूत्रेऽनुवृत्तकर्त राम
५६

रीत्यस्य कर्तृत्वपरत्वमभ्युपगम्य तत्सूत्रेण व्यापारेत्यकारविधानेमीमांसकैरं
गीकृतो यत्तेन यागपचनादीनामपि कर्तरि कृदिति सूत्रेण व्यापारे विधिसंभ
वेदित्यर्थः। न केवलं तदिदं यथार्थमपि तु तत्साधुविरोधोपीत्याह तत्साधुविरोधे
ति। पचनादेरपि असत्वभूतकारकान्वययोग्यव्यापारार्थकत्वे भावेऽनिति सू
त्रभाष्यविरोधापत्तेरित्यर्थः। तत्र हि सत्वभूतभावो घञादेरर्थ इति प्रति
पादितत्वमेव स्यात्। ननु द्विविधभावोपि धात्वर्थोस्तु अतो न द्विरोध
त्यानश्चेति। चेन्नान्येषां दूषणानामसंग्रहः स्वचितः॥ तथाहि आख्यातप्र
त्ययस्य कर्तुरवाच्यत्वेऽभिधानानभिधानव्यवस्थोच्छेदः। कर्तृकर्मक
तो व्यापारेऽवाचकत्वे तृल्लानां पाचकः देवदत्तेन पक्व इत्यादौ प्रयो
गानुपपत्तिः कर्मत्वाद्यसंभवात्। तेषामपि भावमात्रार्थकत्वे गौरवं अनुशा
सनेन तदर्थकत्वलाभश्चान च कर्तरि कृदिति सूत्रस्य कर्तृपदस्वारस्या

धर्मधर्म्युभयबोधकतया भावनायां तद्द्वित्वलाभ इति वाच्यं। आवृत्तौ प्रमा
६० णाभावात्। एवमपि कर्मकर्तृत्वां न द्व्यर्थकत्वानुपपत्तिः स्थिरैव। न च तयोर
वच्छेदकत्वेत्वादावपि कर्तृग्रहणमनुवर्त्य भावनायामन्वितयोर्विधानमिति
वाच्यं। गौरवापत्तेः। एवं गुरुः क्लिष्टव्याप्यापाचयतीत्यत्र हेतुमति चेति सू
त्रबलात्प्रयोजकव्यापारस्य णिजर्थत्वे स्थिते प्रयोज्यव्यापार एवं आख्या
र्थः। एवं च णिजर्थव्यापारस्य ग्रहणत्यपनेया आख्यातार्थव्यापारप्रत्यप्रा
प्त्यान्यापत्तिः। आख्यातार्थव्यापाराश्रययोरनेकत्वात् पाचयतीत्येकवच
नानापत्तिः आख्यातार्थव्यापारान्वयिन्येव तत्त्स्यर्थसंख्यान्वयादुक्तगतसं।
ख्यानभिधाने गुरुः पच्यमानापत्तिः। णिष्यपदेपि दापत्तिश्चेत्याद्यन्य
त्र विस्तरः। इत्यभ्युपेयमिति। पूर्वोक्तदूषणगणनिरासाय कत्वातिरिक्तो व्या
पारोपि धात्वर्थः यत्न आख्यातार्थ इत्यभ्युपेयत इति भावः। सकलव्यापार राम ६०

त्वाभ्रसंभवे मेत्ति विनिगमनाविरहाच्च त्वोपि धातुवाच्य इत्यर्थः। गौरवमि
ति संख्यायां कृत्वादौ नच्छक्तिरस्तु नेतु यत्नेपि अन्याख्यभातपातन्त्रत्वा।
त्ति कल्पनानौचित्यादित्यर्थः। ननु न व्यापारत्वेन धातुत एवत्वाभेभस्य
यस्य यत्नत्वावच्छिन्ने शक्तिकल्पनायां गौरवादित्यर्थः तथा सत्यनुभव
सिद्धफूत्कारत्वादिना बोधस्यानिर्वाहात्। न तत्फलानुकूलयत्नत्वाभे।
पि न तदनुकूलव्यापारानुकूलयत्नाभानत्वाभायमाख्यातस्य यत्ने श
क्तिशक्तिरिति नव्यमीमांसकोक्तमपि न युक्तं तथानभवान्। अन्यथा
व्यापारानुकूलयत्नानुकूलव्यापारत्वाभावतयापि शक्तिकल्प
नापत्तेः पाकं करोतीत्याद्यर्थात्पयकरोति नाविवृयमाणतया।
विच्छित्त्यादिफलानुकूलव्यापारानुकूलापत्त्यादिरूपा भावना आख्या
तार्थः। व्यापारविगमे फलसत्वदशायां पाको विपचते इत्यप्रयोगात्। पचन

पीकादिपदस्य फलावच्छिन्नव्यापारार्थकतया आवश्यकत्वादिति नवा
६१ च्यं। पाकं करोतीत्यत्र पाकपदस्य फलमात्रार्थकत्वात्। फलानुकूला
दसमये फूत्कारादिव्यापारसत्त्वेपि पाको भविष्यतीत्यादिव्यवहारात् क्व
चित्तस्य फलमात्रपरत्वस्यापि दर्शनात्। अन्यत्र फलावच्छिन्नव्या
